# ४ अस्मान् परितः स्थिताः जनाः

0337CH04

अस्माकं परितः प्रत्येकं व्यक्तिः अनन्योऽस्ति - अस्माकं परिवारसदस्याः, शिक्षकाः, मित्राणि च। तेषां नासिके, नेत्रे, केशाः, त्वक्, मुखं च - सर्वाणि भिन्नानि दृश्यन्ते। ते विविधप्रयोजनाय भिन्नसामग्रीभिः निर्मितानि भिन्नानि वस्त्राणि धरन्ति।







अस्य अध्यायस्य अन्ते, भवन्तः जनानां शारीरिक-वैशिष्ट्यानि लक्षयितुं, तानि चित्रयितुं च शक्नुवन्ति। अपि च भवन्तः कला-तत्त्वानि, विविधसामग्रीः, तेषु विद्यमानानि प्रतिरूपाणि, कथञ्च तानि परस्परं भिन्नानि दृश्यन्ते इत्यादिकं सर्वम् अन्विष्य स्वयमेव वस्त्राणां कृति विन्यासान् रचयितुं शक्नुवन्ति।

## क्रियाकलापः - १ एहि, आत्मानं सज्जीकुर्मः !

किं भवन्तः सर्वदा समानवस्त्राणि धारयन्ति?

___

भवन्तः कानि विभिन्नप्रकाराणि वस्त्राणि धारयन्ति ?

___

___

किं भवन्तः स्ववस्त्रेषु कानिचन प्रतिरूपाणि लक्षयन्ति?

___

भवतः इष्टवस्त्रं धारयन्तं स्वस्य एकं चित्रं रचयतु। स्वस्य इच्छानुसारं तस्मिन् वर्णानि, प्रतिरूपाणि च योजयन्तु। यदा भवन्तः प्रतिरूपाणि रचयन्ति, तदा विभिन्नप्रकाराणां बिन्दूनां, रेखानाम्, आकृतीनाञ्च उपयोगं कुर्वन्तु।

**मोद कथा**

यदा आकृतयः पुनरावर्त्यन्ते तदा प्रतिरूपं विन्यासः वा निर्मितं भवति।

© NCERT not to be republished

## क्रियाकलापः - २ किं धार्तव्यं कदा च ?

भवान्/भवती मेलायां गच्छति। किदृशं वस्त्रं धारयति? तत् चित्रयतु।

अथवा

भवान्/भवती भ्रातुः विवाहार्थं गच्छति, किदृशं वस्त्रं धारयितुम् इच्छति?

पारम्परिकवेशे आत्मानं कल्पयित्वा चित्रं रचयतु।

वा

भवतः/भवत्याः अग्रिमजन्मदिनस्य अनुष्ठाने किं धारयितुम् इच्छति? तत् चित्रयतु।

© NCERT not to be republished

## क्रियाकलापः - ३ एकं मुखम् अङ्कयतु

एकं मुखम् अङ्कयित्वा विविधसामग्रीणाम् उपयोगेन विविधशैल्या तत्र नेत्रकर्णकेशनासिका-धरादिकं योजयन्तु।




अनुवर्तयतु - शरीरस्य अन्येषां भागानाम् अथवा सम्पूर्णशरीरस्य चित्रम् अङ्कयन्तु। भवन्तः इच्छानुसारं हस्तपदानि, हस्ताङ्गुल्यः, पादाङ्गुल्यः अन्यानि शरीराङ्गानि वा तत्र योजयितुं शक्नुवन्ति!

© NCERT not to be republished

## क्रियाकलापः - ४ हस्तौ अङ्कयतु

© NCERT not to be republished

स्वस्य हस्तम्

एकस्य प्रौढस्य हस्तम्